श्रीगोपालसहस्रनामस्तोत्रम्



ठाकुर प्रसाद पुस्तक भण्डार कचौड़ीगली वाराणसी

मूल्य १)२५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्री

गोपालसहस्रनामस्तोत्रम्

प्रकाशक—

ठाकुर प्रसाद पुस्तक भण्डार

कचौड़ीगली, वाराणसी ।

मूल्य १.००

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

* श्रीगणेशाय नमः *

गोपालसहस्रनामस्तोत्रम्

पार्वत्युवाच--कैलासशिखरे रम्ये गौरी पृच्छति शङ्करम्। ब्रह्माण्डाखिलनाथस्त्वं सृष्टिसंहारकारकः ॥ १ ॥ त्वमेव पूज्यसे लोकैर्ब्रह्मविष्णुसुरादिभिः। नित्यं पठसि देवेश कस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तोत्रं महेश्वर।२। आश्चर्यमिदमत्यन्तं
जायते मम शङ्कर। तत्प्राणेश महाप्राज्ञ
संशयं छिन्द्धि मे प्रभो ॥३॥ श्रीमहा-
देव उवाच--धन्यासि कृतपुण्यासि
पार्वति प्राणवल्लभे। रहस्यातिरहस्यं
च यत्पृच्छसि वरानने ॥४॥ स्त्रीस्वभा-
वान्महादेवि पुनस्त्वं परिपृच्छसि।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः
॥ ५ ॥ दत्ते च सिद्धिहानिः स्यात्तस्मा-
द्यत्नेन गोपयेत् । इदं रहस्यं परमं
पुरुषार्थप्रदायकम् ॥ ६ ॥ धनरत्नौघ-
माणिक्य-तुरङ्ग-गजादिकम् । ददाति
स्मरणादेव महामोक्षप्रदायकम् ॥७॥
तत्तेऽहं सम्प्रवक्ष्यामि शृणुष्वावहिता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रिये । योऽसौ निरञ्जनो देवश्चित्स्व-
रूपी जनार्दनः ॥८॥ संसार-सागरोत्तार-
करणाय सदा नृणाम् । श्रीरङ्गादिक-
रूपेण त्रैलोक्यं व्याप्य तिष्ठति ॥९॥
ततो लोका महामूढा विष्णुभक्तिवि-
वर्जिताः । निश्चयं नाधिगच्छन्ति
पुनर्नारायणो हरिः ॥१०॥ निरञ्जनो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निराकारो भक्तानां प्रीतिकामदः । वृन्दावनविहाराय गोपालं रूपमुद्वहन् ॥ ११ ॥ मुरली-वादनाधारी राधायै प्रीतिमावहन् । अंशांशेभ्यः समुन्मील्य पूर्णरूपकलायुतः ॥१२॥ श्रीकृष्णचन्द्रो भगवान् नन्दगोपवरोद्यतः । धरणीरूपिणी-मातृ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यशोदानन्ददायकः ॥ १३ ॥ द्वाभ्यां प्रयाचितो नाथो देवक्यां वसुदेवतः । ब्रह्मणाऽभ्यर्थितो देवो देवैरपि सुरेश्वरि ॥१४॥ जातोऽवन्यां मुरलीवेद रोचिका। तया सार्द्धं वचः कृत्वा ततो जातो महीतले ॥१५॥ संसारसारसर्वस्वं श्यामलं महदुज्ज्वलम् । एतज्ज्यो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिरहं वेद्यं चिन्तयामि सनातनम् ।१६।
गौरतेजो विना यस्तु श्यामतेजः
समर्चयेत् । जपेद्वा ध्यायते वापि स
भवेत् पातकी शिवे ॥१७॥ स ब्रह्महा
सुरापी च स्वर्णस्तेयी च पञ्चमः ।
एतैर्दोषैर्विलिप्येत तेजोभेदान्महेश्वरि
॥ १८ ॥ तस्माज्ज्योतिरभूद् द्वेधा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राधामाधवरूपकम् । तस्मादिदं महा-
देवि गोपालेनैव भाषितम् ॥ १९ ॥
दुर्वाससो मुनेर्मोहे कार्तिक्यां रास-
मण्डले । ततः पृष्टवती राधा सन्देहं
भेदमात्मनः ॥२०॥ निरञ्जनात्समु-
त्पन्नं मयाऽधीतं जगन्मयि । श्री-
कृष्णेन ततः प्रोक्तं राधायै नारदाय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च ॥२१॥ ततो नारदतः सर्वे विरला वैष्णवा जनाः । कलौ जानन्ति देवेशि गोपनीयं प्रयत्नतः ॥ २२ ॥ शठाय कृपणार्थाय दाम्भिकाय सुरेश्वरि । ब्रह्महत्यामवाप्नोति तस्माद्यत्नेन गोपयेत् ॥ २३ ॥

अस्य श्रीगोपालसहस्रनामस्तोत्र-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महामन्त्रस्य, श्रीनारद ऋषिः, अनुष्टुप्छन्दः, श्रीगोपालो देवता, कामो बीजं, माया शक्तिः, चन्द्रः कीलकम्। श्रीकृष्णचन्द्रभक्तिरूपफलप्राप्तये श्रीगोपालसहस्रनामजपे विनियोगः।

अथवा-ॐ ऐं क्लीं बीजं, ॐ श्रीं ह्रीं शक्तिः, श्रीवृन्दावननिवासः कीलकं,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीराधाप्रियं परं ब्रह्मेति मन्त्रम्। धर्मा-
दिचतुर्विधपुरुषार्थसिद्ध्यर्थे श्रीगोपाल-
सहस्रनामस्तोत्रजपे विनियोगः ॥

ॐ नारद ऋषये नमः--शिरसि॥१॥
ॐ अनुष्टुप्छन्दसे नमः--मुखे ॥२॥
श्रीगोपालदेवतायै नमः--हृदये ॥ ३ ॥
ॐ क्लीं कीलकाय नमः--नाभौ ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ ह्रीं शक्तये नमः--गुह्ये ॥५॥ ॐ
श्रीं कीलकाय नमः--पादयोः ॥६॥ ॐ
क्लीं कृष्णाय गोविन्दाय गोपीजन-
वल्लभाय स्वाहा--सर्वाङ्गे ॥ ७ ॥
ॐ क्लां अङ्गुष्ठाभ्यां नमः ॥१॥
ॐ क्लीं तर्जनीभ्यां नमः ॥२॥ ॐ
क्लूँ मध्यमाभ्यां नमः ॥३॥ ॐ क्लैं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनामिकाभ्यां नमः ॥४॥ ॐ क्लौं कनिष्ठिकाभ्यां नमः ॥५॥ ॐ क्लः करतलकरपृष्ठाभ्यां नमः ॥६॥

ॐ क्लां हृदयाय नमः ॥ १ ॥ ॐ क्लीं शिरसे स्वाहा ॥२॥ ॐ क्लूं शिखायै व ट् ॥३॥ ॐ क्लैं कवचाय-हुम् ॥४॥ ॐ क्लौं नेत्रत्रयाय वौषट्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥५॥ ॐ क्लः अस्त्राय फट् ॥६॥

अथ मूलमन्त्रन्यासः--ॐक्लीं अङ्गुष्ठाभ्यां नमः ॥१॥ ॐ कृष्णाय तर्जनीभ्यां नमः ॥२॥ ॐ गोविन्दाय मध्यमाभ्यां नमः ॥३॥ ॐ गोपीजन अनामिकाभ्यां नमः ॥४॥ ॐ वल्ल-भाय कनिष्ठिकाभ्यां नमः ॥५॥ ॐ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वाहा करतलकरपृष्ठाभ्यां नमः ॥६॥
इति करन्यासः ।

अथ हृदयादिन्यासः--ॐ क्लीं हृदयाय नमः ॥ १ ॥ ॐ कृष्णाय शिरसे स्वाहा ॥ २ ॥ ॐ गोविन्दाय शिखायै वषट् ॥ ३ ॥ ॐ गोपीजन कवचाय हुम् ॥ ४ ॥ ॐ वल्लभाय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ स्वाहा
अस्त्राय फट् ॥६॥ इति हृदयादिन्यासः।

अथ ध्यानम्--ॐ कस्तूरीतिलकं
ललाटपटले वक्षः स्थले कौस्तुभं,
नासाग्रे वरमौक्तिकं करतले वेणुं करे
कङ्कणम्। सर्वाङ्गे हरिचन्दनंसुललितं
कण्ठे च मुक्तावलिर्गोपस्त्रीवरिवेष्टितो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विजयते गोपालचूडामणिः ॥ १ ॥
फुल्लेन्दीवर-कान्तिमिन्दुवदनं बर्हा-
वतंसप्रियं, श्रीवत्साङ्कमुदारकौस्तुभधरं
पीताम्बरं सुन्दरम् । गोपीनां नयनो-
त्पलार्चिततनुं गोगोपसंघावृतं,
गोविन्दं कलवेणुवादनपरं दिव्याङ्ग-
भूषं भजे ॥२॥ इति ध्यानम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ क्लीं देवः कामदेवः काम-
बीज-शिरोमणिः । श्रीगोपालो मही-
पालः सर्ववेदाङ्गपारगः ॥१॥ धरणी-
पालको धन्यः पुण्डरीकः सनातनः ।
गोपतिर्भूपतिः शास्ता प्रहर्ता विश्व-
तोमुखः ॥ २ ॥ आदिकर्ता महाकर्ता
महाकालः प्रतापवान् । जगज्जीवो जग-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्धाता जगद्धर्ता जगद्धुरुः ॥३॥ मत्स्यो भीमः कुहूभर्ता हर्ता वाराहमूर्तिमान् नारायणो हृषीकेशो गोविन्दो गरुड-ध्वजः ॥ ४ ॥ गोकुलेन्द्रो महाचन्द्रः शर्वरी-प्रिय-कारकः । कमलामुखलो-लाक्षः पुण्डरीकशुभावहः ॥५॥ दुर्वासाः कपिलो भौमः सिन्धु-सागर-सङ्गमः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोविन्दो गोपतिर्गोत्रः कालिन्दी-प्रेम-
पूरकः ॥ ६ ॥ गोपस्वामी गोकुलेन्द्रो
गोवर्धनवरप्रदः। नन्दादिगोकुलत्राता
दाता दारिद्र्यभञ्जनः ॥ ७ ॥ सर्व-
मङ्गलदाता च सर्वकामप्रदायकः।
आदिकर्ता महीभर्ता सर्व-सागर
सिन्धुजः ॥८॥ गजगामी गजोद्धारी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कामी कमलानिधिः । कलङ्करहित-
श्चन्द्रो बिम्बास्यो बिम्बसत्तमः ॥ ९ ॥
मालाकारः कृपाकारः कोकिलास्वर-
भूषणः । रामो नीलाम्बरो देवो हली
दुर्दममर्दनः ॥ १० ॥ सहस्राक्षपुरीभेत्ता
महामारीविनाशनः । शिवः शिवतमो
भेत्ता बलारातिप्रपूजकः ॥ ११ । कुमारी-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वरदायी च वरेण्यो मीनकेतवः ।
नरो नारायणो धीरो राधापतिरुदा-
रधीः ॥ १२ ॥ श्रीपतिः श्रीनिधिः
श्रीमान् रमापतिः प्रतिराजहा । वृन्दा-
पतिः कुलग्रामी धामी ब्रह्मसनातनः
॥१३॥ रेवतीरमणो रामश्चञ्चलश्चारु-
लोचनः । रामायण-शरीरोऽयं रामी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रामः श्रियः पतिः ॥ १४ ॥ शर्वरः शर्वरी शर्वः सर्वत्र शुभदायकः । राधाराधयितो राधी राधाचित्तप्रमोदकः ॥१५॥ राधारतिसुखोपेतो राधामोहनतत्परः । राधावशीकरो राधाहृदयाम्भोज-षट्पदः ॥ १६ ॥ राधालिङ्गनसम्मोहो राधानर्तनकौतुकः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राधासञ्जातसम्प्रीती राधाकामफल-
प्रदः ॥ १७ ॥ वृन्दापतिः कोशनिधिः
कोकशोकविनाशकः । चन्द्रापति-
श्चन्द्रपतिश्चण्डकोदण्डभञ्जनः ।१८।
रामो दाशरथिः रामो भृगुवंश-
समुद्भवः । आत्मारामो जितक्रोधो
मोहो मोहान्धभञ्जनः ॥१९॥ वृष-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भानुर्भवो भावः काश्यपि-करुणानिधिः।
कोलाहलो हली हाली हेला हलधर-
प्रियः ॥२०॥ राधामुखाब्जमार्तण्डो
भास्करो रविजो विधुः। विधिर्विधाता
वरुणो वारुणो वारुणीप्रियः ॥२१॥
रोहिणीहृदयानन्दी वसुदेवात्मजो
बली। नीलाम्बरो रौहिणेयो जरासन्ध-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वधोऽमलः ॥ २२ ॥ नागो नवाम्भो
विरुदो वीरहा वरदो बली । गोपथो
विजयी विद्वान् शिपिविष्टः सनातनः २३
परशुरामवचोग्राही वरग्राही शृगा-
लहा । दमघोषोपदेष्टा च रथग्राही सुद-
र्शनः ॥२४॥ वीरपत्नी यशस्त्राता जरा-
व्याधिविघातकः । द्वारकावासतत्त्वज्ञो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हुताशनवरप्रदः॥२५॥ यमुनावेगसंहारी नीलाम्बरधरः प्रभुः । विभुः शरासनो धन्वी गणेशो गणनायकः।२६।लक्ष्मणो लक्षणो लक्ष्यो रक्षोवंशविनाशनः । वामनो वामनीभूतोऽवामनो वामनाऽसहः।२७। यशोदानन्दनः कर्त्ता यमलार्जुनमुक्तिदः । उलूखली महामानी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दाम बद्धाहयी शमी।२८। भक्तानुकारी भगवान् केशवोऽचलधारकः । केशिहा मधुहा मोही वृषासुरविघातकः ॥२९॥ अघासुरविनाशी च पूतनामोक्षदायकः । कुब्जाविनोदी भगवान् कंसमृत्युर्महामखी ॥ ३० ॥ अश्वमेधो वाजपेयो गोमेधो नरमेधवान् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कन्दर्पकोटिलावण्यश्चन्द्र-कोटिसुशी-
तलः ॥३१॥ रविकोटिप्रतीकाशो वायु-
कोटिमहाबलः। ब्रह्मा ब्रह्माण्डकर्त्ता च
कमलावाञ्छितप्रदः ॥३२॥ कमली
कमलाक्षश्च कमलामुखलोलुपः।
कमलाव्रतधारी च कमलाभः पुरन्दरः
॥ ३३ ॥ सौभाग्याधिकचित्तोऽयं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महामायीमहोत्कटः । तारकारिः सुरत्राता मारीचक्षोभकारकः ॥३४॥ विश्वामित्रप्रियो दान्तो रामो राजीवलोचनः । लङ्काधिपकुलध्वंसी विभीषणवरप्रदः ॥३५॥ सीतानन्दकरो रामो वीरो वारिधिबन्धनः । खरदूषणसंहारी साकेतपुरवासनः ।३६। चन्द्रावलीपतिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कूलः केशी कंसवधोऽमरः। माधवी मधुहा माध्वी माध्वीको माधवो मधुः॥३७॥ मुञ्जाटवीगाहमानो धेनुकारिर्धरात्मजः। वंशीवटविहारी च गोवर्धनवनाश्रयः॥३८॥ तथा तालवनोद्देशी भाण्डीरवनशंखहा। तृणावर्तकथाकारी वृषभानुमनापनिः॥३९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राधाप्राणसमो राधावदनाब्जमधुव्रतः।
गोपीरञ्जनदेवज्ञो लीलाकमलपूजितः
॥४०॥ क्रीडाकमलसन्दोहो गोपिका-
प्रीतिरञ्जनः। रञ्जको रञ्जनो रङ्गो
रङ्गी रङ्गमहीरुहः ॥४१॥ कामः कामा-
रिभक्तोऽयं पुराणपुरुषः कविः। नारदो
देवलो भीमो बालो बालमुखा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

म्बुजः ॥४२॥ अम्बुजो ब्रह्मसाक्षी च योगी दत्तवरो मुनिः॥ ऋषभः पर्वतो ग्रामो नदीपवनवल्लभः ॥४३॥ पद्म-नाभः सुरज्येष्ठो ब्रह्मा रुद्रोऽहिभूषितः। गणानां त्राणकर्ता च गणेशो ग्रहिलो ग्रही ॥४४॥ गणाश्रयो गणाध्यक्षः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केन्द्रो मथुरावल्लभो धुरी ॥ ४५ ॥
भ्रमरः कुन्तली कुन्तीसुतरक्षी महा-
मखी । यमुनावरदाता च कश्यपस्य
वरप्रदः ॥ ४६ ॥ शङ्खचूडवधोद्दामो
गोपीरक्षणतत्परः । पाञ्चजन्यकरो
रामी त्रिरामो वनजा जयः ॥ ४७ ॥
फाल्गुनः फाल्गुनसखो विराधवध-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारकः । रुक्मिणीप्राणनाथश्च सत्य-
भामाप्रियङ्करः ॥४८॥ कल्पवृक्षो महा-
वृक्षो दानवृक्षो महाफलः । अङ्कुशो
भूसुरो भामो भामको भ्रामको
हरिः ॥ ४९ ॥ सरलः शाश्वतो वीरो
यदुवंशी शिवात्मकः । प्रद्युम्नो
बलकर्ता च प्रहर्ता दैत्यदर्पः ॥५०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महाधनो महावीरो वनमालाविभूषणः।
तुलसीदामशोभाढ्यो जालन्धरविना-
शनः ॥ ५१ ॥ शूरः सूर्यो मृकण्डश्च
भास्करो विश्वपूजितः। रविस्तमोहा
वह्निश्च वाडवो वडवानलः ॥ ५२ ॥
दैत्यदर्पविनाशी च गरुड़ो गरुड़ाग्रजः।
गोपीनाथो महीनाथो वृन्दानाथोऽव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रोधकः ॥ ५३ ॥ प्रपञ्ची पञ्चरूपश्च
लतागुल्मश्च गोपतिः । गङ्गा च
यमुनारूपो गोदा वेत्रवती तथा ॥५४॥
कावेरी नर्मदा तापी गण्डकी सरय-
स्तथा । राजसस्तामसः सत्त्वी सर्वाङ्गी
सर्वलोचनः ॥५५॥ सुधामयोऽमृतमयो
योगिनीवल्लभः शिवः । बुद्धो बुद्धिमतां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रेष्ठो विष्णुर्जिष्णुः शचीपतिः ॥५६॥
वंशी वंशधरो लोको विलोको मोह-
नाशनः । रवरावो रवो रावो बालो
बालबलाहकः ॥५७॥ शिवो रुद्रो नलो
नीलो लाङ्गली लाङ्गलाश्रयः । पारदः
पावनोहंसो हंसारूढो जगत्पतिः ॥५८॥
मोहिनी मोहनो मायी महामायो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महामखी । वृषो वृषाकपिः कालः कालोदमनकारकः ॥ ५९ ॥ कुब्जा-भाग्यप्रदो वीरो रजकक्षयकारकः । कोमलो वारुणो राजा जलजो जल-धारकः ॥ ६० ॥ हारकः सर्वपापघ्नः परमेष्ठी पितामहः । खड्गधारी कृपा-कारी राधारमणसुन्दरः ॥ ६१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वादशारण्यसम्भोगी शेषनागफणा-
लयः । कामः श्यामः सुखः श्रीदः
श्रीपतिः श्रीनिधिः कृतिः ॥ ६२ ॥
हरिर्हरो नरो नारो नरोत्तम इषु-
प्रियः । गोपाली चित्तहर्ता च कर्ता
संसारतारकः ॥ ६३ ॥ आदिदेवो
महादेवो गौरीगुरुरनाश्रयः । साधु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मधुर्विधाता त्राताऽक्रूरपरायणः ॥६४॥
रोलम्बी च हयग्रीवो वानरारिर्वना-
श्रयः । वनं वनी वनाध्यक्षो महा-
वन्द्यो महामुनिः ॥६५॥ स्यमन्तक-
मणिप्राज्ञो विज्ञो विघ्नविघातकः ।
गोवर्द्धनो वर्द्धनीयो वर्द्धनीवर्द्धनप्रियः
॥६६॥ वर्द्धन्यो वर्द्धयो वर्द्धी वर्द्धिष्णुः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुमुखप्रियः । वर्द्धितो वृद्धको वृद्धो
वृन्दारकजनप्रियः ॥ ६७ ॥ गोपाल-
रमणीभर्ता साम्बकुष्ठविनाशकः ।
रुक्मिणीहरणः प्रेमप्रेमी चन्द्रावली-
पतिः ॥६८॥ श्रीकर्ताविश्वभर्ता च
नरो नारायणो बली । गणो गणपति-
श्चवदत्तात्रेयो महामुनिः ॥६९॥व्यासो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नारायणो दिव्यो भव्यो भावुको धारकः। श्वःश्रेयसं शिवं भद्रं भावुकं भाविकंशुभम्॥७०॥ शुभात्मकःशुभः शास्ता प्रशास्ता मेघनादहा। ब्रह्मण्यदेवो दीनानामुद्धारकरणक्षमः॥७१॥ कृष्णः कमलपत्राक्षः कृष्णः कमललोचनः। कृष्णः कामी सदा कृष्णः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समस्तप्रियकारकः ॥७२॥ नन्दो नन्दी
महानन्दी मादी मादनकः किली ।
मिली हिली गिली गोली गोलो गोला-
लयोगुली ॥ ७३ ॥ गुग्गुली मारकी
शाखीवटः पिपप्लकः कृती । म्लेच्छहा
कालकर्ता च यशोदा यशएव च ॥७४॥
अच्युतः केशवो विष्णुर्हरिः सत्यो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जनार्दनः । हंसो नारायणो लीलो नीलो भक्तिपरायणः ॥७५॥ जानकी-बल्लभो रामो विरामो विघ्ननाशनः । सहस्रांशुर्महाभानुर्वीरबाहुर्महोदधिः ॥७६॥ समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः । गोकुलानन्दकारी च प्रतिज्ञापरिपालकः ॥ ७७ ॥ सदारामः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृपारामो महारामो धनुर्धरः । पर्वतः
पर्वताकारो गयो गेयो द्विजप्रियः ।७८।
कम्बलाश्वतरो रामो रामायणप्रव-
र्तकः । द्योदिवौ दिवसोदिव्यो भव्यो
भाविभयापहः ॥७९॥ पार्वतीभाग्य-
सहितो भ्राता लक्ष्मीविलासवान् ।
विलासी साहसी सर्वी गर्वी गर्वित-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लोचनः ॥ ८० ॥ मुरारिर्लोकधर्मज्ञो
जीवनो जीवनान्तकः । यमो यमादि-
र्यमनो यामी यामविधायकः ॥ ८१ ॥
वसुली पांसुली पांसुः पाण्डुरर्जुन-
वल्लभः । ललिता-चन्द्रिकामाली
माली मालाम्बुजाश्रयः ॥८२॥ अम्बु-
जाक्षो महायक्षो दक्षश्चिन्तामणिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रभुः। मणिर्दिनमणिश्चैव केदारो बद-
रीश्रयः ॥८३॥ बदरीवनसंप्रीतो व्यासः
सत्यवतीसुतः। अमरारिनिहन्ता च
सुधासिन्धुर्विधूदयः ॥८४॥ चन्द्रो रविः
शिवः शूली चक्री चैव गदाधरः।
श्रीकर्ता श्रीपतिः श्रीदः श्रीदेवो देवकी-
सुतः ॥८५॥ श्रीपतिः पुण्डरीकाक्षः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पद्मनाभो जगत्पतिः । वासुदेवोऽप्रमे-
यात्मा केशवो गरुडध्वजः ॥८६॥
नारायणः परं धाम देवदेवो महेश्वरः ।
चक्रपाणिः कलापूर्णो वेदवेद्यो दया-
निधिः ॥८७॥ भगवान् सर्वभूतेशो
गोपालः सर्वपालकः । अनन्तो
निर्गुणो नित्यो निर्विकल्पो निरञ्जनः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥८८॥ निराधारो निराकारो निरा-
भासो निराश्रयः । पुरुषः प्रणवातीतो
मुकुन्दः परमेश्वरः ॥८९॥ क्षणावनिः
सार्वभौमो बकुण्ठो भक्तवत्सलः ।
विष्णुर्दामोदरः कृष्णो माधवो मधु-
रापतिः ॥ ९० ॥ देवकीगर्भसम्भूतो
यशोदावत्सलो हरिः । शिवः सङ्क-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्षणः शम्भुर्भूतनाथो दिवस्पतिः ॥ ९१ ॥ अव्ययः सर्वधर्मज्ञो निर्मलो निरुपद्रवः । निर्वाणनायको नित्यो नीलजीमूतसन्निभः ॥ ९२ ॥ कला-क्षयश्च सर्वज्ञः कमलारूपतत्परः । हृषी-केशः पीतवासा वसुदेवप्रियात्मजः ॥ ९३ ॥ नन्दगोपकुमारार्यो नव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नीताशनः प्रभुः । पुराणपुरुषः श्रेष्ठः
शङ्खपाणिः सुविक्रमः ॥ ९४ ॥ अनि-
रुद्धश्चक्ररथः शार्ङ्गपाणिश्चतुर्भुजः ।
गदाधरः सुरार्तिघ्नो गोविन्दो नन्द-
कायुधः ॥ ९५ ॥ वृन्दावनचरः शौरि-
र्वेणुवाद्यविशारदः । तृणावर्तान्तको
भीमसाहसो बहुविक्रमः ॥९६॥ शक-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

टासुरसंहारी बकासुरविनाशनः ।
धेनुकासुरसंहारी पूतनारिर्नृकेशरी
॥ ९७ ॥ पितामहो गुरुः साक्षी प्रत्य-
गात्मा सदाशिवः । अप्रमेयो प्रभुः
प्राज्ञोऽप्रतर्क्यः स्वप्नवर्द्धनः ॥ ९८ ॥
धन्यो मान्यो भवो भावो धीरः
शान्तो जगद्गुरुः । अन्तर्यामी-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वरो दिव्यो दैवज्ञो देवता गुरुः ॥ ९९ ॥ क्षीराब्धिशायनो धाता लक्ष्मीवाँल्लक्ष्मणाग्रजः । धात्रीपति-रमेयात्मा चन्द्रशेखरपूजितः ॥१००॥ लोकसाक्षी जगच्चक्षुः पुण्यचारित्र-कीर्तनः । कोटिमन्मथ-सौन्दर्यो जगन्मोहनविग्रहः ॥१०१॥ मन्दस्मि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तानतो गोपो गोपिकापरिवेष्टितः ।
फुल्लारविन्दनयनश्चाणूरान्ध्रनिषूदनः
॥ १०२ ॥ इन्दीवरदलश्यामो बर्हि-
बर्हावतंसकः । मुरलीनिनदाह्लादो
दिव्यमाल्याम्बराश्रयः ॥ १०३ ॥
सुकपोलयुगः सुभ्रूयुगलः सुललाटकः ।
कम्बुग्रीवो विशालाक्षो लक्ष्मीवाञ्छुभ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लक्षणः ॥ १०४ ॥ पीनवक्षाश्चतुर्बाहुश्च-
तुर्मूर्तिस्त्रिविक्रमः । कलङ्करहितः शुद्धो
दुष्टशत्रुनिबर्हणः ॥ १०५ ॥ किरीटकुण्ड-
लधरः कटकाङ्गदमण्डितः । मुद्रिका-
भरणोपेतः कटिसूत्रविराजितः ॥ १०६ ॥
मञ्जीररञ्जितपदः सर्वाभरणभू-
षितः । विन्यस्तपादयुगलो दिव्यमङ्गल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विग्रहः ॥१०७॥ गोपिकानयनानन्दः पूर्णचन्द्रनिभाननः। समस्तजगदानन्दः सुन्दरो लोकनन्दनः॥१०८॥ यमुनातीरसञ्चारी राधामन्मथवैभवः। गोपनारीप्रियो दान्तो गोपीवस्त्रापहारकः ॥१०९॥ शृङ्गारमूर्तिः श्रीधामा तारको मूलकारणम्। सृष्टिसंरक्षणोपायः क्रूरा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुरविभञ्जनः॥१९०॥नरकासुरसंहारी मुरारिर्वैरिमर्दनः। आदितेयप्रियो दैत्य-भीकरश्चेन्दुशेखरः॥१९१॥जरासन्ध-कुलध्वंसी कंसारातिः सुविक्रमः। पुण्य-श्लोकः कीर्तनीयो यादवेन्द्रो जगन्नुतः॥१९२॥ रुक्मिणीरमणः सत्यभामा-जाम्बवतीप्रियः।मित्रविन्दानाग्नजिती-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लक्ष्मणा-समुपासितः।१११३। सुधाकर-
कुले जातोऽनन्तप्रबलविक्रमः।सर्वसौ-
भाग्यसम्पन्नो द्वारकायामुपस्थितः
॥ १११४॥ भद्रासूर्यसुतानाथो लीला-
मानुषविग्रहः।सहस्रषोडशस्त्रीशो भोग-
मोक्षकदायकः ॥१११५॥ वेदान्तसंवेद्यो
वैद्यो ब्रह्माण्डनायकः। गोवर्द्धनधरो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाथः सर्वजीवदयापरः॥११६॥मूर्तिमान्
सर्वभूतात्मा आर्तत्राणपरायणः।सर्वज्ञः
सर्वसुलभः सर्वशास्त्रविशारदः॥११७॥
षड्गुणैश्वर्यसम्पन्नः पूर्णकामोधुरन्धरः।
महानुभावः कैवल्यदायको लोकना-
यकः॥११८॥ आदिमध्यान्तरहितः
शुद्धसात्त्विकविग्रहः। असमानः सम-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तात्मा शरणागतवत्सलः ॥ ११९ ॥
उत्पत्तिस्थिति-संहारकारणं सर्वकार-
णम्। गम्भीरः सर्वभावज्ञः सच्चिदानन्द-
विग्रहः ॥१२०॥ विष्वक्सेनः सत्यसन्धः
सत्यवान् सत्यविक्रमः। सत्यव्रतः सत्य-
संज्ञः सर्वधर्मपरायणः ॥१२१॥ आपन्ना-
र्तिप्रशमनो द्रौपदीमानरक्षकः। कन्द-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंजनकः प्राज्ञो जगन्नाटकवैभवः।१२२।
भक्तिवश्यो गुणातीतः सर्वैश्वर्यप्रदा-
यकः। दमघोषसुतद्वेषी बाणबाहुविख-
ण्डनः॥१२३॥ भीष्मभक्तिप्रदो दिव्यः
कौरवान्वयनाशनः। कौन्तेयप्रिय-
बन्धुश्च पार्थस्यन्दनसारथिः॥१२४॥
नारसिंहो महावीरः स्तम्भजातो महा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बलः। प्रह्लादवरदः सत्यो देवपूज्योऽम-
यङ्करः॥ १२५ ॥ उपेन्द्र इन्द्रावरजो
वामनो बलिबन्धनः । गजेन्द्रवरदः
स्वामी सर्वदेवनमस्कृतः। १२६॥ शेष-
पर्यङ्कशयनो वैनतेयरथो जयी। अव्या-
हतबलैश्वर्यसम्पन्नः पूर्णमानसः। १२७।
योगेश्वरेश्वरः साक्षी क्षेत्रज्ञो ज्ञानदायकः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योगिहृत्पङ्कजावासो योगमायास-
मन्वितः ॥१२८॥ नादबिन्दुकलातीतश्चतुर्वर्गफलप्रदः। सुषुम्णामार्गसञ्चारी
देहस्यान्तरसंस्थितः ॥१२९॥ देहेन्द्रियमनःप्राणसाक्षी चैतःप्रसादकः। सूक्ष्मः
सर्वगतो देही ज्ञानदर्पणगोचरः ॥१३०॥
तत्त्वत्रयात्मकोऽव्यक्तः कुण्डलीसमु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पाश्रितः । ब्रह्मण्यः सर्वधर्मज्ञः शान्तो
दान्तो गतक्लमः ॥१३१॥ श्रीनिवासः
सदानन्दो विश्वमूर्तिर्महाप्रभुः । सहस्र-
शीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।१३२।
समस्तभुवनाधारः समस्तप्राणरक्षकः ।
समस्तसर्वभावज्ञो गोपिकाप्राणवल्लभः
॥ १३३ ॥ नित्योत्सवो नित्यसौख्यो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नित्यश्रीर्नित्यमङ्गलः । व्यूहार्चितो जगन्नाथः श्रीवैकण्ठपुराधिपः ॥१३४॥ पूर्णानन्दघनीभूतो गोपवेषधरो हरिः । कलापकुसुमश्यामः कोमलः शान्त-विग्रहः ॥१३५॥ गोपाङ्गनावृतोऽनन्तो वृन्दावनसमाश्रयः । वेणुवादरतः श्रेष्ठो देवानां हितकारकः ॥१३६॥ बाल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रीडासमासक्तो नवनीतस्य तस्करः।
गोपालकामिनीजारश्चौरजारशिखा-
मणिः ॥१३७॥ परञ्ज्योतिः पराकाशः
परावासः परिस्फुटः। अष्टादशाक्षरो
मन्त्रो व्यापको लोकपावनः ॥१३८॥
सप्तकोटिमहामन्त्रशेखरो देवशेखरः।
विज्ञानं ज्ञानसन्धानस्तेजोराशिर्जग-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्पतिः ॥१३९॥ भक्तलोकप्रसन्नात्मा भक्तमन्दारविग्रहः । भक्तदारिद्र्यद-मनो भक्तानां प्रीतिदायकः ॥१४०॥ भक्ताधीनमनाः पूज्यो भक्तलोक-शिवङ्करः । भक्ताभीष्टप्रदो सर्वभक्ता-घौघनिकृन्तनः ॥१४१॥ अपारकरुणा-सिन्धुर्भगवान् भक्ततत्परः ॥१४२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

* अथ फलश्रुतिः *

इति श्रीराधिकानाथसहस्रनाम कीर्तितम् । स्मरणात्पापराशीनां खण्डनं मृत्युनाशनम् ॥१॥ वैष्णवानां प्रियकरं महारोगनिवारणम् । ब्रह्महत्या सुरापानं परस्त्रीगमनं तथा ॥२॥ पर-द्रव्यापहरणं परद्वेषसमन्वितम् । मानसं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाचिकं कायं यत्पापं पापसम्भवम्॥३॥
सहस्रनामपठनात्सर्वं नश्यति तत्क्षणात्।
महादारिद्र्ययुक्तो यो वैष्णवो विष्णु-
भक्तिमान् ॥४॥ कार्तिक्यां संपठेद्रात्रौ
शतमष्टोत्तरं क्रमात्। पीताम्बरधरो धी-
मान् सुगन्धैः पुष्पचन्दनैः॥५॥ पुस्तकं
पूजयित्वा तु नैवेद्यादिभिरेव च। राधा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्यानाङ्कितो धीरो वनमालाविभूषितः ॥६॥ शतमष्टोत्तरं देवि! पठेन्नामसहस्रकम्। चैत्रशुक्ले च कृष्णे च कुहूसंक्रांतिवासरे॥७॥पठितव्यं प्रयत्नेन त्रैलोक्यं मोहयेत्क्षणात्। तुलसीमालया युक्तो वैष्णवो भक्तितत्परः ॥८॥ रविवारे च शुक्रे च द्वादश्यां श्राद्धवासरे। ब्राह्मणं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पूजयित्वा च भोजयित्वा विधानतः।९।
पठेन्नामसहस्रं च ततः सिद्धिः प्रजायते।
महानिशायां सततं वैष्णवो यः पठे-
त्सदा ॥१०॥ देशान्तरगता लक्ष्मीः
समायाति न संशयः। त्रैलोक्ये च महा-
देवि! सुन्दर्यः काममोहिताः ॥११॥
मुग्धाः स्वयं समायान्ति वैष्णवं च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भजन्ति ताः। रोगी रोगात्प्रमुच्येत बद्धः
मुच्येत बन्धनात्।१२। गर्भिणी जनये-
त्पुत्रं कन्या विन्दति सत्पतिम्। राजानः
वश्यतां यान्ति किं पुनः क्षुद्रमानवाः
॥१३॥सहस्रनामश्रवणात् पठनात् पूज-
नात् प्रिये!। धारणात् सर्वमाप्नोति
वैष्णवः नात्र संशयः ॥१४॥ वंशीवटे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चान्यवटे तथा पिप्पलकेऽथवा । कद-
म्बपादपतले गोपालमूर्तिसन्निधौ ।१५।
यः पठेद्वैष्णवो नित्यं स याति हरिम-
न्दिरम् । कृष्णेनोक्तं राधिकायै मयि
प्रोक्तं तथा शिवे!॥१६॥ नारदाय मया
प्रोक्तं नारदेन प्रकाशितम् । मया त्वयि
वरारोहे ! प्रोक्तमेतत् सुदुर्लभम्॥१७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोपनीयं प्रयत्नेन न प्रकाश्यं कथञ्चन।
शठाय पापिने चैव लम्पटाय विशेषतः
॥१८॥ न दातव्यं न दातव्यं न दातव्यं
कदाचन। देयं शिष्याय शान्ताय
विष्णुभक्तिरताय च ॥१९॥ गोदान-
ब्रह्मयज्ञादे र्वाजपेयशतस्य च। अश्व-
मेधसहस्रस्य फलं पाठे भवेद्ध्रुवम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥२०॥ मोहनं स्तम्भनं चैव मारणोच्चा-
टनादिकम्। यद्यद्वाञ्छति चित्तेन तत्त-
त्प्राप्नोति वैष्णवः ॥२१॥ एकादश्यां
नरः स्नात्वा सुगन्धिद्रव्यतैलकैः।
आहारं ब्राह्मणं दत्वा दक्षिणां स्वर्ण-
भूषणम् ॥२२॥ तत आरम्भकर्त्ताऽसौ
सर्वं प्राप्नोति मानवः। शतावृतं सहस्रं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च यः पठेद्व षणवो जनः।२३। श्रीवृन्दा-
वनचन्द्रस्य प्रसादात्सर्वमाप्नुयात्।
यद्गृहे पुस्तकं देवि! पूजितं चैव तिष्ठति
॥२४॥ न मारी न च दुर्भिक्षं नोपसर्गभयं
क्वचित्। सर्पादिभूतयक्षाद्या नश्यन्ते
नात्र संशयः ॥२५॥ श्रीगोपालो महा-
देवि! वसेत्तस्य गृहे सदा। गृहे यत्र सहस्रं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च नाम्नां तिष्ठति पूजितम् ॥२६॥

ॐतत्सदिति श्रीसंमोहनतंत्रेपार्वतीश्वरसंवादे श्रीगोपालसहस्रनामस्तोत्रंसंपूर्णम्

एकोऽपि कृष्णस्य कृतः प्रणामः दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥
कृष्णव्रती कृष्णमनुस्मरन्तो रात्रौ च कृष्णं पुनरुत्थिता ये।
ते कृष्णदेहं प्रविशन्ति कृष्णमाज्यं यथा यज्ञहुते हुताशे ॥

आरती लक्ष्मीजी की—जय लक्ष्मी माता जय लक्ष्मी माता॥ तुमकूँ निशिदिन सेवत हर विष्णू धाता।टेर। ब्रह्माणी रुद्राणी कमला तूही है जगमाता। सूर्य चन्द्रमा ध्यावत नारद ऋषि गाता।जय०। दुर्गा रूप निरंजनि सुख-सम्पति-दाता॥ जो कोई तुमकूँ ध्यावत ऋधिसिद्धि धन पाता॥जय०॥ राम प्रताप मैया की शुभ दृष्टि चाता॥ जय लक्ष्मी माता। तुमकूँ निशिदिन सेवत हर विष्णु धाता॥जय०॥ इति श्रीलक्ष्मीजी की आरती समाप्त।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

* श्रीगणेशाय नमः *

अगस्त्यमुनिविरचितम्

श्रीलक्ष्मीस्तोत्रम्

अथ पद्मपलाशाक्षि जय त्वं श्रीपतिप्रिये ।
जय मातर्महालक्ष्मि संसारार्णवतारिणि ॥१॥
महलक्ष्मि नमस्तुभ्यं नमस्तुभ्यं सुरेश्वरि ।
हरिप्रिये नमस्तुभ्यं नमस्तुभ्यं दयानिधे ॥२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पद्मालये नमस्तुभ्यं नमस्तुभ्यं च सर्वदे ।
सर्वभूतहितार्थाय वसुवृष्टिं सदा कुरु ॥३॥
जगन्मातर्नमस्तुभ्यं नमस्तुभ्यं दयानिधे ।
दयावति नमस्तुभ्यं विश्वेश्वरि नमोऽस्तु ते ॥४॥
नमः क्षीरार्णवसुते नमस्त्रैलोक्यधारिणि ।
वसुश्रेष्ठे नमस्तुभ्यं रक्ष मां शरणागतम् ॥५॥
रक्ष त्वं देवदेवेशि देवदेवस्य वल्लभे ।
दारिद्र्यात्त्राहि मां लक्ष्मि कृपां कुरु ममोपरि ॥६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नमस्त्रैलोक्यजननि नमस्त्रैलोक्यपावनि ।
ब्रह्मादयो नमन्ते त्वां जगदानन्ददायिनि ॥७॥
विष्णुप्रिये नमस्तुभ्यं नमस्तुभ्यं जगद्धिते ।
आर्तिहन्त्रि नमस्तुभ्यं समृद्धिं कुरु मे सदा ॥८॥
अञ्जवासे नमस्तुभ्यं चपलायै नमो नमः ।
चञ्चलायै नमस्तुभ्यं ललितायै नमो नमः ॥९॥
नमः प्रद्युम्नजननि मातस्तुभ्यं नमो नमः ।
परिपालय मां मातर्देवि तुभ्यं शरणागतम् ॥१०॥
शरण्ये त्वां प्रपन्नोऽस्मि कमले कमलालये ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्राहि त्राहि महालक्ष्मि परित्राणपरायणे ॥११॥
पाण्डित्यं शोभते नैव न शोभन्ति गुणा नरे ।
शीलत्वं नैव शोभतेमहालक्ष्मि त्वया विना॥१२॥
तावद्विराजते रूपं तावच्छील विराजते ।
तावद्गुणंनराणां च यावल्लक्ष्मीःप्रसीदति।१३।
लक्ष्मि त्वयाऽलंकृतमानवा ये पापैर्विमुक्ता
नृपलोकमान्याः । गुणैर्विहीना गुणिनो भवन्ति
दुःशीलिनः शीलवतां वरिष्ठाः ॥१४॥ लक्ष्मी-
र्भूषयते रूपं लक्ष्मीर्भूषयते कुलम् । लक्ष्मीर्भ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षयते विद्यां सर्वां लक्ष्मीर्विशिष्यते ॥१५॥ लक्ष्मि त्वद्गुणकीर्तनेन कमला भूयात्यलं जिह्वतां रुद्राद्या रविचन्द्रदेवपतयो वक्तुं च नैव क्षमाः। अस्माभिस्तव रूपलक्षणगुणान्। वक्तुं कथं शक्यते मातर्मां परिपाहि विश्वजननि कृत्वा ममेष्टं ध्रुवम् ॥१६॥ दीनार्तिभीतं भवतापपीडितं धनैर्विहीनं तव पार्श्वमागतम्। कृपानिधि-त्वान्मम लक्ष्मि सत्वरं धनप्रदानाद्धननायकं कुरु ॥ १७ ॥ मां विलोक्य जननि हरिप्रिये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निर्धनं तव समीपमागतम् । देहि मे झटिति लक्ष्मि एकाग्रं वस्त्रकाञ्चनवराभमद्भुतम् ॥१८॥ त्वमेव जननी लक्ष्मी पिता लक्ष्मी त्वमेव च । भ्राता त्वं च सखा लक्ष्मि विद्या लक्ष्मि त्वमेव च ॥१९॥ त्राहि त्राहि महालक्ष्मि त्राहि त्राहि सुरेश्वरि । त्राहि त्राहि जगन्मातर्दारिद्र्यात्त्राहि वेगतः ॥२०॥ नमस्तुभ्यं जगद्धात्रि नमस्तुभ्यं नमो नमः । धर्माधारे नमस्तुभ्यं नमः संपत्तिदायिनी ॥२१॥ दरिद्र्यार्णवमग्नोऽहं निमग्नोहं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रसातले। मज्जन्तं मां करे धृत्वा तूद्धर त्वं रमे द्रुतम् ॥२२॥ किं लक्ष्मि बहुनोक्तेन जल्पितेन पुनः पुनः। अन्यत्र शरणं नास्ति सत्यं सत्यं हरिप्रिये ॥२३॥ एतच्छ्रुत्वाऽगस्तिवाक्यं हृष्यमाणा हरिप्रिया। उवाच मधुरां वाणीं तुष्टाहं तव सर्वदा ॥२४॥ लक्ष्मीरुवाच--यत्त्वयोक्तमिदं स्तोत्रं यः पठिष्यति मानवः। शृणोति च महाभागस्तस्याहं वशवर्तिनी ॥ २५ ॥ नित्यं पठति यो भक्त्या न लक्ष्मीस्तस्य नश्यति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋणञ्च नश्यते तीव्रं वियोगं नैव पश्यति ॥२६॥
यः पठेत्प्रातरुत्थाय श्रद्धाभक्तिसमन्वितः । गृहे
तस्य सदा स्थास्ये नित्यं श्रीपतिना सह ॥२७॥
सुखसौभाग्यसम्पन्नो मनस्वी बुद्धिमान् भवेत् ।
पुत्रवान् गुणवान् श्रेष्ठो भोगभोक्ता च मानवः
॥२८॥ इदं स्तोत्रं महापुण्यं लक्ष्म्यागस्तिप्रकी-
र्तितम् । विष्णुप्रसादजननं चतुर्वर्गफलप्रदम्
॥२९॥ राजद्वारे जयश्चैव शत्रोश्चैव पराजयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूतप्रेतपिशाचानां व्याघ्राणां न भयं तथा ॥३०॥ न शस्त्रानलतोयौघाद्भयं तस्य प्रजायते। दुर्वृत्तानां च पापानां बहु हानिकरं परम् ॥३१॥ मन्दुरा-करिशालासु गवां गोष्ठे समाहितः ॥ पठेत् दोषशान्त्यर्थं महापातकनाशनम् ॥३२॥ सर्वसौख्यकरं नृणामायुरारोग्यदं तथा ॥ अग-स्तिमुनिना प्रोक्तं प्रजानां हितकाम्यया ॥३३॥

इत्यगस्तिविरचितं लक्ष्मीस्तोत्रं सम्पूर्णम् ॥

मुद्रक—ठाकुर प्रसाद प्रेस, कचौड़ीगली, वाराणसी।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हमारे यहाँ की प्रकाशित पुस्तकें मँगाकर पढ़ें—

दुर्गासप्तसती भाषा टीका	८.००	पार्वण श्राद्ध पद्धति	१.००
दुर्गासप्तसती ३२ पेजी मूल	४.००	शुक्लययुर्वेदीयसंध्योपासन	०.८०
महाशिवरात्रि व्रतकथा	१.००	अर्जुन-गीता	०.८०
नीति शृंगार वैराग्य शतक	३.००	ज्ञान माला	०.८०
धनिष्ठापञ्चक शान्ति	२.००	सोमवारव्रतकथा भा. टी.	१.००
विन्ध्यवासिनी पुष्पाञ्जलि	१.५०	हरितालिका व्रतकथा भाषा टीका	१.००
स्वप्नविज्ञान	१.५०	आरती संग्रह	०.८०
अनन्त व्रतकथा	१.००		

पता—ठाकुर प्रसाद पुस्तक भण्डार

कचौड़ीगली, वाराणसी।

मुद्रक—ठाकुरप्रसाद प्रेस, कचौड़ीगली, वाराणसी।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri